# *GĪTA GŌVINDAM*

# *Jayadēva Kavi Viracitam*

TO NAVIGATE : —
*CLICK* ON THE BOOKMARKS PANEL ON LEFT *or*
*CLICK* HERE TO GO TO TABLE OF CONTENTS

***(Typeset using dēvnāgariTEX , pdfLATEX, and hyperref)***

© ***July 2005***

# Contents


**0 Invocation** 3

0.1 Gopalaka dhyanam . . . 3

0.2 Jayadeva dhyanam . . . 3

**1 First sargam** 4

1.1 Invocation . . . 4

1.2 pralayapayodhijale (aSTapadi 1) . . . 5

1.3 shritakamalAkuca (aSTapadi 2) . . . 6

1.4 lalita lavanga (aSTapadi 3) . . . 8

1.5 candana carcita (aSTapadi 4) . . . 9

**2 Second Sargam** 11

2.1 sancaradadhara (aSTapadi 5) . . . 11

2.2 nibhṙtanikuñja (aSTapadi 6) . . . 12

**3 Third Sargam** 13

3.1 mAmiyaM calitA (aSTapadi 7) . . . 14

**4 Fourth Sargam** 16

4.1 nindati candana (aSTapadi 8) . . . 16

4.2 stanavinihitam (aSTapadi 9) . . . 17

**5 Fifth Sargam** 19

5.1 vahati malaya (aSTapadi 10) . . . 19

5.2 ratisukhasAre (aSTapadi 11) . . . 20

**6 Sixth Sargam** 22

6.1 pashyati dishi (aSTapadi 12) . . . 22

**7 Seventh Sargam** 24

7.1 kathita samaya (aSTapadi 13) . . . 24

7.2 smarasama rocita (aSTapadi 14) . . . 26

7.3 samudita madane (aSTapadi 15) . . . 27

7.4 anila tarala (aSTapadi 16) . . . . . . . . . . . . . . . . . 28

**8 Eighth Sargam** **29**

8.1 rajani janita (aSTapadi 17) . . . . . . . . . . . . . . . . . 30

**9 Ninth Sargam** **31**

9.1 harirabhisarati (aSTapadi 18) . . . . . . . . . . . . . . . 31

**10 Tenth Sargam** **33**

10.1 vadasi yadi (aSTapadi 19) . . . . . . . . . . . . . . . . . 33

**11 Eleventh Sargam** **36**

11.1 viracita cATu (aSTapadi 20) . . . . . . . . . . . . . . . 36

11.2 manjutara (aSTapadi 21) . . . . . . . . . . . . . . . . . 38

11.3 rAdhA vadana (aSTapadi 22) . . . . . . . . . . . . . . . 39

**12 Twelth Sargam** **40**

12.1 kisalaya shayana (aSTapadi 23) . . . . . . . . . . . . . 41

12.2 kuru yadunandana (aSTapadi 24) . . . . . . . . . . . . 42

# ॥ गीतगोविन्दम् ॥

## ॥ श्रीजयदेवि कवि विरचितम् ॥

# 0 Invocation

## 0.1 Gopalaka dhyanam

## ॥ श्री गोपालक ध्यानम्॥

यद्गोपीवदनेन्दुमण्डनमभूत्कस्तूरिकापत्रकं
यल्लक्ष्मीकुचशातकुंभकलशे व्यागोचमिन्दीवरम् ।
यन्निर्वाणविधानसाधनविधौ सिद्धाञ्जनं योगिनां
तन्नश्यामळमाविरस्तु हृदये कृष्णाभिधानं महः ॥१ ॥

## 0.2 Jayadeva dhyanam

## ॥ श्री जयदेव ध्यानम् ॥

राधामनोरमरमावररासलील-
गानामृतैकभणितं कविराजराजम् ।
श्रीमाधवार्चनविधावनुरागसद्म-
पद्मावतीप्रियतमं प्रणतोस्मि नित्यम् ॥२ ॥

श्रीगोपलविलासिनी वलयसद्रत्नादिमुग्धाकृति
श्रीराधापतिपादपद्मभजनानन्दाब्धिमग्नोऽनिशम् ॥
लोके सत्कविराजराज इति यः ख्यातो दयाम्भोनिधिः
तं वन्दे जयदेवसद्गुरुमहं पद्मावतीवल्लभम् ॥३॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 1 First sargam

## 1.1 Invocation

॥ प्रथमः सर्गः ॥

॥ सामोददामोदरः ॥

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशितश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥ १॥

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेतं
एतं करोति जयदेवकविः प्रबन्धम् ॥ २॥

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥ ३॥

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम् ॥ ४॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 1.2 pralayapayodhijale (aSTapadi 1)

॥ गीतम् १ ॥

प्रलयपयोधिजले धृतवानसि वेदं ।
विहितवहित्रचरित्रमखेदम् ॥
केशव धृतमीनशरीर जय जगदीश हरे ॥१॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ।
धरणिधरणकिणचक्रगरिष्ठे ॥
केशव धृतकच्छपरूप जय जगदीश हरे ॥२॥

वसति दशनशिखरे धरणी तव लग्ना ।
शशिनि कलङ्ककलेव निमग्ना ॥
केशव धृतसूकररूप जय जगदीश हरे ॥३॥

तव करकमलवरे नखमद्भुतशृङ्गं ।
दलितहिरण्यकशिपुतनुभृङ्गम् ॥
केशव धृतनरहरिरूप जय जगदीश हरे ॥४॥

छलयसि विक्रमणे बलिमद्भुतवामन ।
पदनखनीरजनितजनपावन ॥
केशव धृतवामनरूप जय जगदीश हरे ॥५॥

क्षत्रियरुधिरमये जगदपगतपापं ।
स्नपयसि पयसि शमितभवतापम् ॥
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥६॥

वितरसि दिक्षु रणे दिक्पतिकमनीयं ।
दशमुखमौलिबलिं रमणीयम् ॥
केशव धृतरामशरीर जय जगदीश हरे ॥७॥

वहसि वपुषि विशदे वसनं जलदाभं ।

हलहतिभीतिमिलितयमुनाभम् ॥
केशव धृतहलधररूप जय जगदीश हरे ॥ ८॥

निन्दसि यज्ञविधेरहह श्रुतिजातं ।

सदय हृदयदर्शितपशुघातम् ॥
केशव धृतबुद्धशरीर जय जगदीश हरे ॥ ९॥

म्लेच्छनिवहनिधने कलयसि करवालं ।

धूमकेतुमिव किमपि करालम् ॥
केशव धृतकल्किशरीर जय जगदीश हरे ॥ १०॥

श्रीजयदेवकवेरिदमुदितमुदारं ।

शृणु सुखदं शुभदं भवसारम् ॥
केशव धृतदशविधरूप जय जगदीश हरे ॥ ११॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते

दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।

पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ ५॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 1.3 shritakamalAkuca (aSTapadi 2)

# ॥ गीतम् २ ॥

श्रितकमलाकुचमण्डल धृतकुण्डल ए ।
कलितललितवनमाल जय जयदेव हरे ॥ १॥

दिनमणिमण्डलमण्डन भवखण्डन ए ।

मुनिजनमानसहंस जय जयदेव हरे ॥ २॥

कालियविषधरगञ्जन जनरञ्जन ए ।
यदुकुलनलिनदिनेश जय जयदेव हरे ॥ ३॥

मधुमुरनरकविनाशन गरुडासन ए ।
सुरकुलकेलिनिदान जय जयदेव हरे ॥ ४॥

अमलकमलदललोचन भवमोचन ए ।
त्रिभुवनभवननिधान जय जयदेव हरे ॥ ५॥

जनकसुताकृतभूषण जितदूषण ए ।
समरशमितदशकण्ठ जय जयदेव हरे ॥ ६॥

अभिनवजलधरसुन्दर धृतमन्दर ए ।
श्रीमुखचन्द्रचकोर जय जयदेव हरे ॥ ७॥

तव चरणे प्रणता वयमिति भावय ए ।
कुरु कुशलम् प्रणतेषु जय जय देव हरे ॥ ८॥

श्रीजयदेवकवेरिदं कुरुते मुदं ए ।
मङ्गलमुज्ज्वलगीतं जय जयदेव हरे ॥ ९॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेद-
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ ६॥

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां राधां सरसमिदमुचे सहचरी ॥ ७॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 1.4 lalita lavanga (aSTapadi 3)

## ॥ गीतम् ३ ॥

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ॥
विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥१॥

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।
अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥२॥

मृगमदसौरभरभसवशंवदनवदलमालतमाले ।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥३॥

मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे ।
मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ॥४॥

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकदन्तुरिताशे ॥५॥

माधविकापरिमलललिते नवमालिकजातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥६॥

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
बृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥७॥

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

दरविदलितमल्लीवल्लिचञ्चत्पराग -

प्रकटितपटवासैर्वासयन् काननानि ।
इह हि वहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ ८॥

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्षणः
प्राप्तप्राणसमा समागमरसोल्लासैरमी वासराः ॥ ९॥

अनेकनारीपरिरम्भसम्भ्रम-
स्फुरन्मनोहारिविलासलालसम् ।
मुरारिमाराद्रुपदर्शयन्त्यसौ
सखी समक्षं पुनराह राधिकाम् ॥ १०॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 1.5 candana carcita (aSTapadi 4)

## ॥ गीतम् ४ ॥

चन्दनचर्चितनीलकलेबरपीतवसनवनमाली ।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ॥
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे ॥ १॥

पीनपयोधरभारभरेण हरिं परिरम्य सरागं ।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥ २॥

कापि विलासविलोलविलोचनखेलनजनितमनोजं ।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥ ३॥

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले ।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥ ४ ॥

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ॥ ५ ॥

करतलतालतरलवलयावलिकलितकलस्वनवंशे ।
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे ॥ ६ ॥

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामां ।
पश्यति सस्मितचारुपरामपरामनुगच्छति वामाम् ॥ ७ ॥

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यं ।
वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम् ॥ ८ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

विश्वेषामनुरञ्जने जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मदहु मुग्धो हरिः क्रीडति ॥ ११ ॥

अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।
किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूः कुहूरिति कलोत्तलाः पिकानां गिरः ॥ १२ ॥

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णे परिरम्यनिर्भरमुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुत्-
व्याजादुद्भटचुम्बितस्मितमनोहरी हरिः पातु वः ॥ १३ ॥

॥ इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 2 Second Sargam

॥ द्वितीयः सर्गः ॥

## ॥ अक्लेशकेशवः ॥

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम् ॥१४॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 2.1 sancaradadhara (aSTapadi 5)

## ॥ गीतम् ५ ॥

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशं ।
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ॥
रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥१॥

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशं ।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम् ॥२॥

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभं ।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ॥३॥

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं ।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम् ॥४॥

जलदपटलवलदिन्दुविनिन्दकचन्दनतिलकललाटं ।
पीनघनस्तनमण्डलमर्दननिर्दयहृदयकपाटम् ॥५॥

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारं ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ॥ ६ ॥

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तं ।
मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम् ॥ ७ ॥

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपं ।
हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम् ॥ ८ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

गणयति गुणग्रामं भामं भ्रमादपि नेहते
वहति च परितोषं दोषं विमुञ्चति दूरतः ।
युवतिषु वलस्तृष्णे कृष्णे विहारिणी मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥ १५ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 2.2 nibhṙtanikuñja (aSTapadi 6)

## ॥ गीतम् ६ ॥

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तं ।
चकितविलोकितसकलदिशा रतिरभसरसेन हसन्तम् ॥
सखि हे केशिमथनमुदारं
रमय मया सह मदनमनोरथभावितया सविकारम् ॥ १ ॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजधनदुकूलम् ॥ २ ।

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥ ३ ॥

अलसनिमीलितलोचनया पुलकावलिललितकपोलं ।

श्रमजलसकलकलेवरया वरमदनमदादतिलोलम् ॥ ४ ॥

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारं ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ॥ ५ ॥

चरणरणितमनिनूपुरया परिपूरितसुरतवितानं ।
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम् ॥ ६ ॥

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजं ।
निःसहनिपतितनुलतया मधुसूदनमुदितमनोजम् ॥ ७ ॥

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं ।
सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम् ॥ ८ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

हस्तस्रस्तविलासवण्शमनृजुभ्रूवल्लीमद्बल्लवी -
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्दस्थलम् ।
मामुद्वीक्ष्य विलक्षितं स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥ १६ ॥

दुरालोकस्तोकस्तबकनवकाशोकलतिका -
विकासः कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल -
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥ १७ ॥

॥ इति गीतगोविन्दे अक्लेशकेशवो नाम द्वितीयः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 3 Third Sargam

### ॥ तृतीयः सर्गः ॥

# ॥ मुग्धमधुसूदनः ॥

कंसारिरपि संसारवासनाबन्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥ १८ ॥

इतस्ततस्तामनुसृत्य राधिका-
मनङ्गबाणव्रणखिन्नमानसः ।
कृतानुतापः स् कलिन्दनन्दिनी-
तटान्तकुञ्जे विषसाद माधवः ॥ १९ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 3.1 mAmiyaM calitA (aSTapadi 7)

# ॥ गीतम् ७ ॥

मामियं चलिता विलोक्य वृतं वधूनिचयेन ।
सापराधतया मयापि वारितातिभयेन ॥
हरिहरि हतादरतया गता सा कुपितेव ॥ १॥

किं करिष्यति किं वदिष्यति सा चिरं विरहेण ।
किं धनेन जनेन किं मम जीवितेन गृहेण ॥ २॥

चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण ।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण ॥ ३॥

तामहं हृदि संगतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि ॥ ४॥

तन्वि खिन्नमसूयया हृदयं तवाकलयामि ।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि ॥ ५॥

दृश्यसे पुरतो गतागतमेव मे विदधासि ।

किं पुरेव ससंभ्रमं परिरम्भणं न ददासि ॥ ६॥

क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ॥ ७॥

वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि ॥ २०॥

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं पौरुषम् ।
तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षाशुग-
श्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते ॥ २१॥

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं च तन्वि तनुतां बिम्बादरो रागवन्
सद्वृत्तस्तनमण्दलस्तव कथं प्राणैर्मम क्रीडति ॥ २२॥

तानि स्पर्शसुखानि ते च तरलाः स्निग्ध दृशोर्विभ्रम-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्ती गिरां वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्या लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते ॥ २३॥

भ्रूपल्लवं धनुरपाङ्गतरङ्गितनि
बाणाः गुणः श्रवणपालिरिति स्मरेण ।

तस्यामनङ्गजयजङ्गमदेवतायाम्
अस्त्राणि निर्जितजगन्ति किमर्पितानि ॥ २४ ॥

॥ इति श्रीगितगोविन्दे मुग्धमधुसूदनो नाम
तृतीयः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 4 Fourth Sargam

## ॥ चतुर्थः सर्गः ॥

## ॥ स्निग्धमधुसूदनः ॥

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् ।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥ २५ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 4.1 nindati candana (aSTapadi 8)

## ॥ गीतम् ८ ॥

निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरं ।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् ॥
सा विरहे तव दीना
माधव मनसिजविशिखभयादिव भावनया त्वयि लीना ॥ १ ॥

अविरलनिपतितमदनशरादिव भवदवनाय विशालं ।
स्वहृदयमर्मणी वर्म करोति सजलनलिनीदलजालम् ॥ २ ॥

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं ।

व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥ ३॥

वहति च गलितविलोचनजलभरमाननकमलमुदारं ।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम् ॥ ४॥

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतं ।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ॥ ५॥

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ॥ ६॥

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापं ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् ॥ ७॥

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं ।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्शार्दूलविक्रीडितम् ॥ २६॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 4.2 stanavinihitam (aSTapadi 9)

## ॥ गीतम् ९ ॥

स्तनविनिहितमपि हारमुदारं ।
सा मनुते कृशतनुरतिभारम् ॥
राधिका विरहे तव केशव ॥ १॥

सरसमसृणमपि मलयजपङ्कं ।

पश्यति विषमिव वपुषि सशङ्कम् ॥ २॥

श्वसितपवनमनुपमपरिणाहं ।
मदनदहनमिव वहति सदाहम् ॥ ३॥

दिशि दिशि किरति सजलकणजालं ।
नयननलिनमिव विगलितनालम् ॥ ४॥

नयनविषयमपि किसलयतल्पं ।
कलयति विहितहुताशविकल्पम् ॥ ५॥

त्यजति न पाणितलेन कपोलं ।
बालशशिनमिव सायमलोलम् ॥ ६॥

हरिरिति हरिरिति जपति सकामं ।
विरहविहितमरणेव निकामम् ॥ ७॥

श्रीजयदेवभणितमिति गीतं ।
सुखयतु केशवपदमुपुनीतम् ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्
स्ववैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा नान्तकः ॥ २७॥

स्मरातुरां दैवतवैद्यहृद्य
त्वदङ्गसङ्गामृतमात्रसाध्याम् ।
विमुक्तबाधां कुरुषे न राधा-
मुपेन्द्र वज्रादपि दारुणोऽसि ॥ २८॥

कन्दर्पज्वरसंज्वरस्तुरतनोराश्चर्यमस्याश्चिरंस्
चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु संताम्यति ।

किंतु क्लान्तिवशेन शीतलतनुं त्वामेकमेव प्रियं
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥ २९ ॥

क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम् ॥ ३० ॥

॥ इति गीतगोविन्दे स्निग्धमाधवो नाम
चतुर्थः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 5 Fifth Sargam

॥ पञ्चमः सर्गः ॥

## ॥ साकांक्षपुण्डरीकाक्षः ॥

अहमिह निवसामि याहि राधां
अनुनय मद्वचनेन चानयेथाः ।
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ ३१ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 5.1 vahati malaya (aSTapadi 10)

॥ गीतम् १० ॥

वहति मलयसमीरे मदनमुपनिधाय ।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥
तव विरहे वनमाली सखि सीदति ॥१॥

दहतो शिशिरमयूखे मरणमनुकरोति ।
पतति मदनविशिखे विलपति विकलतरोऽति ॥२॥

ध्वनति मधुपसमूहे श्रवणमपिदधाति ।
मनसि वलितविरहे निशि निशि रुजमुपयति ॥३॥

वसति विपिनविताने त्यजति ललितधाम ।
लुठति धरणिशयने बहु विलपति तव नाम ॥४॥

भणति कविजयदेवे विरहिविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥५॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

पूर्वं यत्र समं त्वया रतिपतेरासादितः सिद्धय-
स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमात्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति ॥३२॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 5.2 ratisukhasAre (aSTapadi 11)

## ॥ गीतम् ११ ॥

रतिसुखसारे गतमभिसारे मदनमनोहरवेषं ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम् ॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ॥१॥

नाम समेतं कृतसंकेतं वादयते मृदुवेणुं ।

बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुम् ॥ २॥

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानं ।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ॥ ३॥

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलं ।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ॥ ४॥

उरसि मुरारेरुपहितहारे घन इव तरलबलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥ ५॥

विगलितवसनं परिहृतरसनं घटय जघनमपिधानं ।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम् ॥ ६॥

हरिरभिमानी रजनिरिदानीमियमपि याति विरामं ।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥ ७॥

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयं ।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति ।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥ ३३॥

त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम् ।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ॥ ३४॥

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु संभ्रमादनु रतारम्भादनु प्रीतयोः ।

अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाषणैर्जानतो -

र्दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः ॥ ३५॥

सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि

प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।

कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः

सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थताम् ॥ ३६॥

॥ इति श्रीगीतगोविन्देऽभिसारिकवर्णने

साकाङ्क्षपुण्डरीकाक्षो नाम

पञ्चमः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 6 Sixth Sargam

## ॥ षष्ठः सर्गः ॥

## ॥ कुण्ठवैकुण्ठः ॥

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ।

तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥ ३७॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 6.1 pashyati dishi (aSTapadi 12)

## ॥ गीतम् १२ ॥

पश्यति दिशि दिशि रहसि भवन्तं ।
तदधरमधुरमधूनि पिबन्तम् ॥
नाथ हरे सीदति राधा वासगृहे ॥१॥

त्वदभिसरणरभसेन वलन्ती ।
पतति पदानि कियन्ति चलन्ती ॥२॥

विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया ॥३॥

मुहुरवलोकितमण्डनलीला ।
मधुरिपुरहमिति भावनशीला ॥४॥

त्वरितमुपैति न कथमभिसारं ।
हरिरिति वदति सखीमनुवारम् ॥५॥

श्लिष्यति चुम्बति जलधरकल्पं ।
हरिरुपगत इति तिमिरमनल्पम् ॥६॥

भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा ॥७॥

श्रीजयदेवकवेरिदमुदितं ।
रसिकजनं तनुतामतिमुदितम् ॥८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजडिमकाकुव्याकुलं व्याहरन्ती ।
तव कितव विधायामन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥३८॥

अङ्गेष्वाभरणं करोति बहुशः पतेऽपि संचारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति ।
इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशत-

व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥ ३९॥

॥ इति गीतगोविन्दे वासकसज्जावर्णने
कुण्ठवैकुण्ठो नाम
षष्टः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 7 Seventh Sargam

# ॥ सप्तमः सर्गः ॥

# ॥ नागरनारायणः ॥

अत्रान्तरे च कुलटाकुलवर्त्मपात-
संजातपातक इव स्फुटलाञ्छनश्रीः ।
वृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥ ४०॥

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा ।
विरचितविविधविलापं सा परितापं चकारोच्चैः ॥ ४१॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 7.1 kathita samaya (aSTapadi 13)

## ॥ गीतं १३ ॥

कथितसमयेऽपि हरिरहह न ययौ वनं ।
मम विफलमिदममलरूपमपि यौवनम् ॥

यामि हे कमिह शरणं सखीजनवचनवञ्चिता ॥१॥

यदनुगमनाय निशि गहनमपि शीलितं ।
तेन मम हृदयमिदमसमशरकीलितम् ॥२॥

मम मरणमेव वरमतिवितथकेतना ।
किमिह विषहामि विरहानलचेतना ॥३॥

मामहह विधुरयति मधुरमधुयामिनी ।
कापि हरिमनुभवति कृतसुकृतकामिनी ॥४॥

अहह कलयामि वलयादिमणीभूषणं ।
हरिविरहदहनवहनेन बहुदूषणम् ॥५॥

कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति मामतिविषमशीलया ॥६॥

अहमिह निवसामि नगणितवनवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥७॥

हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभि-

र्बद्धो बन्धुभिरन्धकारिणि वनोपान्ते किमु भ्राम्यति ।

कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः

संकेतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः ॥४२॥

अथागतं माधवमन्तरेण

सखीमियं वीक्ष्य विषादमूकाम् ।

विशङ्कमाना रमितं कयापि
जनार्दनं दृष्टवदेतदाह ॥४३॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 7.2 smarasama rocita (aSTapadi 14)

## ॥ गीतम् १४ ॥

स्मरसमरोचितविरचितवेशा ।

गलितकुसुमदरविलुलितकेशा ॥

कापि मधुरिपुणा विलसति युवतिरधिकगुणा ॥ १॥

हरिपरिरम्भणवलितविकारा ।

कुचकलशोपरि तरलितहारा ॥ २॥

विचलदलकललिताननचन्द्रा ।

तदधरपानरभसकृततन्द्रा ॥ ३॥

चञ्चलकुण्डलदलितकपोला ।

मुखरितरसनजघनगतिलोला ॥ ४॥

दयितविलोकितलज्जितहसिता ।

बहुविधकूजितरतिरसरसिता ॥ ५॥

विपुलपुलकपृथुवेपथुभङ्गा ।

श्वसितनिमीलितविकसदनङ्गा ॥ ६॥

श्रमजलकणभरसुभगशरीरा ।

परिपतितोरसि रतिरणधीरा ॥ ७॥

श्रीजयदेवभणितहरिरमितम् ।

कलिकलुषं जनयतु परिशमितम् ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

विरहपाण्डुमुरारिमुखाम्बुज-

द्युतिरियं तिरयन्नपि चेतनाम् ।

विधुरतीव तनोति मनोभुवः

सहृदये हृदये मदनव्यथाम् ॥ ४४॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 7.3 samudita madane (aSTapadi 15)

## ॥ गीतम् १५ ॥

समुदितमदने रमणीवदने चुम्बनवलिताधरे ।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ॥
रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥१॥

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ।
कुरबककुसुमं चपलासुषमं रतिपतिमृगकानने ॥२॥

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥३॥

जितबिसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ॥४॥

रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरसनं तोरणहसनं विकरति कृतवासने ॥५॥

चरणकिसलये कमलनिलये नखमणिगणपूजिते ।
बहिरपवरणं यावकभरणं जनयति हृदि योजिते ॥६॥

रमयति सदृशं कामपि सुभृशं खलहलधरसोदरे ।
किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे ॥७॥

इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके ॥८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम् ।

पश्याद्य प्रियसम्गमाय दयितस्याकृष्यमाणं गणै-
रुत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥ ४५॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 7.4 anila tarala (aSTapadi 16)

## ॥ गीतम् १६ ॥

अनिलतरलकुवलयनयनेन ।
तपति न सा किसलयशयनेन ॥
सखि या रमिता वनमालिना ॥ १॥

विकसितसरसिजललितमुखेन ।
स्फुटति न सा मनसिजविशिखेन ॥ २॥

अमृतमधुरमृदुतरवचनेन ।
ज्वलति न सा मलयजपवनेन ॥ ३॥

स्थलजलरुहरुचिकरचरणेन ।
लुठति न सा हिमकरकिरणेन ॥ ४॥

सजलजलदसमुदयरुचिरेण ।
दलति न सा हृदि चिरविरहेण ॥ ५॥

कनकनिकषरुचिशुचिवसनेन ।
श्वसति न सा परिजनहसनेन ॥ ६॥

सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन ॥ ७॥

श्रीजयदेवभणितवचनेन ।
प्रविशतु हरिरपि हृदयमनेन ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

मनोभवानन्दन चन्दनानिल
प्रसीद रे दक्षिण मुञ्च वामताम् ।
क्षणं जगत्प्राण विधाय माधवं
पुरो मम प्राणहरो भविष्यसि ॥ ४६॥

रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन्दुनोति मनोगते ।
हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः ॥ ४७॥

बाधां विधेहि मलयानिल पञ्चबाण
प्राणान्गृहाण न गृहं पुनराश्रयिष्ये ।
किं ते कृतान्तभगिनि क्षमया तरङ्गै-
रङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥ ४८॥

॥ इति गीतगोविन्दे विप्रलब्धावर्णने
नागनारायणो नाम
सप्तमः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 8 Eighth Sargam

## ॥ अष्टमः सर्गः॥

## ॥ विलक्ष्यलक्ष्मीपतिः ॥

अथ कथमपि यामिनीं विनीय
स्मरशरजर्जरितापि सा प्रभाते ।

अनुनयवचनं वदन्तमग्रे
प्रणतमपि प्रियमाह साभ्यसूयम् ॥ ४९॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 8.1 rajani janita (aSTapadi 17)

## ॥ गीतम् १७ ॥

रजनिजनितगुरुजागररागकषायितमलसनिवेशं ।
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ॥
हरिहरि याहि माधव याहि केशव मा वद कैतववादं
तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥ ५०॥

कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपं ।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥ २॥

वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखं ।
मरकतशकलकलितकलधौतलिपिरेव रतिजयलेखम् ॥ ३॥

चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारं ।
दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम् ॥ ४॥

दशनपदं भवदधरगतं मम जनयति चेतसि खेदं ।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम् ॥ ५॥

बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनं ।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम् ॥ ६॥

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रं ।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥ ७॥

श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापं ।
शृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापम् ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

तदेवं पश्यन्त्याः प्रसरदनुरागं बहिरिव

प्रियापादालक्तच्छुरितमरुणच्छायहृदयम् ।

ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥५०॥

इति गीतगोविन्दे खण्डितावर्णने
विलक्ष्यलक्ष्मीपतिर्नाम
अष्टमः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 9 Ninth Sargam

## ॥ नवमः सर्गः ॥

## ॥ मन्दमुकुन्दः ॥

तामथ मन्मथखिन्नां

रतिरसभिन्नां विषादसम्पन्नाम् ।

अनुचिन्तितहरिचरितां
कलहान्तरितमुवाच सखी ॥५१॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 9.1 harirabhisarati (aSTapadi 18)

## ॥ गीतम् १८ ॥

हरिरभिसरति वहति मधुपवने ।

किमपरमधिकसुखं सखि भुवने ॥

माधवे मा कुरु मानिनि मानमये ॥१॥

तालफलादपि गुरुमतिसरसं ।
किं विफलीकुरुषे कुचकलशम् ॥२॥

कति न कथितमिदमनुपदमचिरं ।
मा परिहर हरिमतिशयरुचिरम् ॥३॥

किमिति विषीदसि रोदिषि विकला ।
विहसति युवतिसभा तव सकला ॥४॥

सजलनलिनीदलशीतलशयने ।
हरिमवलोक्य सफलयनयने ॥५॥

जनयसि मनसि किमिति गुरुखेदं ।
शृणु मम वचनमनीहितभेदम् ॥६॥

हरिरुपयातु वदतु बहुमधुरं ।
किमिति करोषि हृदयमतिविधुरम् ॥७॥

श्रीजयदेवभणितमतिललितं ।
सुखयतु रसिकजनं हरिचरितम् ॥८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये ।
युक्तं तद्विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥५२॥

॥ इति गीतगोविन्दे कलहान्तरितावर्णने
मन्दमुकुन्दो नाम
नवमः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 10 Tenth Sargam

## ॥ दशमः सर्गः ॥

## ॥ चतुरचतुर्भुजः ॥

अत्रान्तरे मसृणरोषवशामसीम्-

निःश्वासनिःसहमुखीं सुमुखीमुपेत्य ।

सव्रीडमीक्षितसखीवदनां दिनान्ते

सानन्दगद्गदपदं हरिरित्युवाच ॥५३॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 10.1 vadasi yadi (aSTapadi 19)

## ॥ गीतम् १९ ॥

वदसि यदि किंचिदपि दन्तरुचिकौमुदी

हरति दरतिमिरमतिघोरम् ।

स्फुरदधरसीधवे तव वदनचन्द्रमा

रोचयतु लोचनचकोरम् ॥

प्रिये चारुशीले मुञ्च मयि मानमनिदानं

सपदि मदनानलो दहति मम मानसं

देहि मुखकमलमधुपानम् ॥१॥

सत्यमेवासि यदि सुदति मयि कोपिनी

देहि खरनखशरघातम् ।

घटय भुजबन्धनं जनय रदखण्डनं

येन वा भवति सुखजातम् ॥२॥

त्वमसि मम भूषणं त्वमसि मम जीवनं

त्वमसि भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनोरोधिनि
तत्र मम हृदयमतिरत्नम् ॥ ३॥

नीलनलिनाभमपि तन्वि तव लोचनं
धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयसि
कृष्णमिदमेतदनुरूपम् ॥ ४॥

स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु तव हृदयदेशम् ।
रसतु रशनापि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशम् ॥ ५॥

स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ।
भण मसृणवाणि करवाणि पदपङ्कजं
सरसलसदलक्तकरागम् ॥ ६॥

स्मरगरलखण्डनं मम शिरसि मण्डनं
देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदनारुणो
हरतु तदुपाहितविकारम् ॥ ७॥

इति चटुलचाटुपटुचारु मुरवैरिणो
राधिकामधि वचनजातम् ।
जयति पद्मावतीरमणजयदेवकवि-
भारतीभणितमतिशातम् ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

परिहर कृतातङ्के शङ्कां त्वया सततं घन-

स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि ।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
स्तनभरपरीरम्भारम्भे विधेहि विधेयताम् ॥ ५४ ॥

मुग्धे विधेहि मयि निर्दयदन्तदंश-
दोर्वल्लिबन्धनिबिडस्तनपीडनानि ।
चण्डि त्वमेव मुदमञ्च न पञ्चबाण-
चण्डालकाण्डदलनादसवः प्रयान्तु ॥ ५५ ॥

व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं
तरुणी मधुरालापैस्तापं विनोदय दृष्टिभिः ।
सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः ॥ ५६ ॥

बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि-
र्गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनम् ।
नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदान्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ॥ ५७ ॥

दृशौ तव मदालसे वदनमिन्दुसंदीपकं
गतिर्जनमनोरमा विधुतरम्भमूरुद्वयम् ।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-
वहो विबुधयौवनं वहसि तन्वी पृथ्वीगता ॥ ५८ ॥

॥ इति श्रीगीतगोविन्दे मानिनीवर्णने
चतुरचतुर्भुजो नाम
दशमः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 11 Eleventh Sargam

## ॥ एकादशः सर्गः ॥

## ॥ सानन्ददामोदरः ॥

सुचिरमनुनयने प्रीणयित्वा मृगाक्षीं
गतवति कृतवेशे केशवे कुञ्जशय्याम् ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां कापि राधां जगाद ॥ ५९ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 11.1 viracita cATu (aSTapadi 20)

## ॥ गीतम् २० ॥

विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं ।
संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम् ॥
मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ १ ॥

घनजघनस्तनभारभरे दरमन्थरचरणविहारं ।
मुखरितमणीमञ्जीरमुपैहि विधेहि मरालविकारम् ॥ २ ॥

शृणु रमणीयतरं तरुणीजनमोहनमधुपविरावं ।
कुसुमशरासनशासनबन्दिनि पिकनिकरे भज भावम् ॥ ३ ॥

अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बं ।
प्रेरणमिव करभोरु करोति गतिं प्रतिमुञ्च विलम्बम् ॥ ४ ॥

स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भं ।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम् ॥ ५ ॥

अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं ।
चण्डि रसितरशनारवडिण्डिममभिसर सरसमलज्जम् ॥ ६ ॥

स्मरशरसुभगनखेन करेण सखीमवलम्ब्य सलीलं ।
चल वलयक्कणीतैरवबोधय हरमपि निजगतिशीलम् ॥ ७ ॥

श्रीजयदेवभणितमधरीकृतहारमुदासितवामं ।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम् ॥ ८ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यङ्गमालिङ्गनैः

प्रीतिं यास्यति रम्यते सखि समागत्येति चिन्ताकुलः ।

स त्वां पश्यति वेपते पुलकयत्यानन्दति स्विद्यति

प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः ॥ ६० ॥ अक्ष्णोर्निक्षिपदञ्जनं

श्रवणयोस्तापिच्छगुच्छावलीं

मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापात्रकम् ।

धूर्तानामभिसारसत्वरहृदां विष्वङ्निकुञ्जे सखि

ध्वान्तं नीलनिचोलचारु सदृशां प्रत्यङ्गमालिङ्गति ॥ ६१ ॥

काश्मीरगौरवपुषामभिसारिकाणाम्

आबद्धरेखमभितो रुचिमञ्जरीभिः ।

एतत्तमालदलनीलतमं तमिस्रं

तत्प्रेमहेमनिकषोपलतां तनोति ॥ ६२ ॥ हारावलीतरलकाञ्चनकाञ्चिदाम -

केयूरकङ्कणमणिद्युतिदीपितस्य ।

द्वारे निकुञ्जनिलयस्यहरिं निरीक्ष्य
व्रीडावतीमथ सखी निजगाह राधाम् ॥ ६३ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 11.2 manjutara (aSTapadi 21)

# ॥ गीतम् २१ ॥

मञ्जुतरकुञ्जतलकेलिसदने ।

विलस रतिरभसहसितवदने ॥

प्रविश राधे माधवसमीपमिह ॥ १ ॥

नवभवदशोकदलशयनसारे ।

विलस कुचकलशतरलहारे ॥ २ ॥

कुसुमचयरचितशुचिवासगेहे ।

विलस कुसुमसुकुमारदेहे ॥ ३ ॥

चलमलयवनपवनसुरभिशीते ।

विलस रसवलितललितगीते ॥ ४ ॥

मधुमुदितमधुपकुलकलितरावे ।

विलस मदनरससरसभावे ॥ ५ ॥

मधुतरलपिकनिकरनिनदमुखरे ।

विलस दशनरुचिरुचिरशिखरे ॥ ६ ॥

वितत बहुवल्लिनवपल्लवघने ।

विलस चिरमलसपीनजघने ॥ ७ ॥

विहितपद्मावतीसुखसमाजे ।

भणति जयदेवकविराजराजे ॥ ८ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः

कन्दर्पेण तु पातुमिच्छति सुधासंबाधबिम्बाधरम् ।

अस्याङ्गं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-

क्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः ॥ ६४ ॥

सा ससाध्वससानन्दं गोविन्दे लोललोचना ।
सिञ्जानमञ्जुमञ्जीरं प्रविवेश निवेशनम् ॥ ६५ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 11.3 rAdhA vadana (aSTapadi 22)

## ॥ गीतम् २२ ॥

राधावदनविलोकनविकसितविविधविकारविभङ्गं ।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम् ॥
हरिमेकरसं चिरमभिलषितविलासं
सा ददार्श गुरुहर्षवशंवदवदनमनङ्गनिवासम् ॥ १ ॥

हारममलतरतारमुरसि दधतं परिरभ्य विदूरं ।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम् ॥ २ ॥

श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलं ।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलम् ॥ ३ ॥

तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागं ।
स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तडागम् ॥ ४ ॥

वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभं ।
स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम् ॥ ५ ॥

शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशं ।
तिमिरोदितविधुमण्दलनिर्मलमलयजतिलकनिवेशम् ॥ ६ ॥

विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरं ।
मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम् ॥ ७ ॥

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं ।
प्रणमत हृदि सुचिरं विनिधाय हरिं सुकृतोदयसारम् ॥ ८ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
प्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः ।
इदानीं राधायाः प्रियतमसमालोकसमये
पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः ॥ ६६ ॥

भवन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-
स्मितं याते गेहाद्बहिरवहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशरसमाकूलसुभगं
सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः ॥ ६७ ॥

॥ इति श्रीगीतगोविन्दे राधिकामिलने
सानन्ददामोदरो नामैकादशः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

# 12 Twelth Sargam

## ॥ द्वादशः सर्गः ॥

## ॥ सुप्रीतपीताम्बरः ॥

गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर-
स्मरपरवशाकूतस्फीतस्मितस्नपिताधरम् ।
सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव-
प्रसवशयने निक्षिप्ताक्षीमुवाच हरः ॥ ६८ ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 12.1 kisalaya shayana (aSTapadi 23)

## ॥ गीतम् २३ ॥

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशं ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ॥
क्षणमधुना नारायणमनुगतमनुसर राधिके ॥ १॥

करकमलेन करोमि चरणमहमागमितासि विदूरं ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम् ॥ २॥

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलं ।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम् ॥ ३॥

प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापं ।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम् ॥ ४॥

अधरसुधारसमुपनय भाविनि जीवय मृतमिव दासं ।
त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम् ॥ ५॥

शशिमुखि मुखरय मणिरशनागुणमनुगुणकण्ठनिनादं ।
श्रुतियुगले पिकरुतविकले मम शमय चिरादवसादम् ॥ ६॥

मामतिविफलरुषा विकलीकृतमवलोकितमधुनेदं ।
मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदम् ॥ ७॥

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं ।
जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम् ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

मारङ्के रतिकेलिसंकुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात् ।
निष्पन्दा जघनस्थली शिथिलता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति ॥ ६९॥

अथ कान्तं रतिक्लान्तमपि मण्डनवाञ्छया ।
निजगाद निराबाधा राधा स्वाधीनभर्तृका ॥ ७०॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 12.2 kuru yadunandana (aSTapadi 24)

## ॥ गीतम् २४ ॥

कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे ।

मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे ।
निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने ॥ १॥

अलिकुलगञ्जनमञ्जनकं रतिनायकसायकमोचने ।
त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने ॥ २॥

नयनकुरङ्गतरङ्गविकासनिरासकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे शुभवेश निवेशय कुण्डले ॥ ३॥

भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम संमुखे ।
जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ॥ ४॥

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे ।
विहितकलङ्ककलं कमलानन विश्रमितश्रमशीकरे ॥ ५॥

मम रुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे ।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे ॥ ६॥

सरसघने जघने मम शम्बरदारणवारणकन्दरे ।
मणिरशनावसनाभरणानि शुभाशय वासय सुन्दरे ॥ ७॥

श्रीजयदेववचसि रुचिरे हृदयं सदयं कुरु मण्डने ।
हरिचरणस्मरणामृतकृतकलिकलुषभवज्वरखण्डने ॥ ८॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयो-
र्घटय जघने काञ्चीमञ्च स्रजा कबरीभरम् ।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरा-
विति निगतितः प्रीतः पीताम्बरोऽपि तथाकरोत् ॥ ७१॥

यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्वमपि यत्काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥ ७२॥

श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥ ७३॥

॥ इति श्रीजयदेवकृतौ गीतगोविन्दे
सुप्रीतपीताम्बरो नाम
द्वादशः सर्गः ॥

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

॥ इति गीतगोविन्दं समाप्तम् ॥

☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆ ☆